# Shri Bhadradri Rama Suprabhata Stotram

# શ્રીભદ્રાદ્રિરામસુપ્રભાતસ્તોત્રમ્

## Document Information

Text title : Bhadradri Ramasuprabhatam

File name : bhadrAdrirAmasuprabhAtam.itx

Category : raama, suprabhAta

Location : doc_raama

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : October 19, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 21, 2019

*sanskritdocuments.org*

# શ્રીભદ્રાદ્રિરામસુપ્રભાતસ્તોત્રમ્

વામાઙ્કસ્થિતજાનકીપરિલસત્કોદણ્ડદણ્ડં કરે
    ચક્રં ચોર્ધ્વકરેણ બાહુયુગલે શઙ્ખં શરં દક્ષિણે ।
બિભ્રાણં જલજાતપત્રનયનં ભદ્રાદ્રિમૂર્ધસ્થિતં
    કેયૂરાદિવિભૂષિતં રઘુપતિં સૌમિત્રિયુક્તં ભજે ॥ ૧॥

શ્રીમચ્ચન્દનચર્ચિતોન્નતકુચવ્યાલોલમાલાઙ્કિતાં
    તાટઙ્કદ્યુતિસત્કપોલયુગલાં પીતામ્બરાલઙ્કૃતામ્ ।
કાઞ્ચીકઙ્કણહારનૂપુરલસત્કલ્યાણદામાન્વિતાં
    શ્રી વામાઙ્કગતાં સરોરુહકરાં સીતાં મૃગાક્ષીં ભજે ॥ ૨॥

દ્વિભુજં સ્વર્ણવપુષં પદ્મપત્રનિભેક્ષણમ્ ।
ધનુર્બાણધરં ધીરં રામાનુજમહં ભજે ॥ ૩॥

કૌસલ્યા સુપ્રજા રામ પૂર્વા સન્ધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠ નરશાર્દૂલ કર્તવ્યં દૈવમાહ્નિકમ્ ॥ ૪॥

ઉત્તિષ્ઠોત્તિષ્ઠ ગોવિન્દ ઉત્તિષ્ઠ ગરુડધ્વજ ।
ઉત્તિષ્ઠ કમલાકાન્ત ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૫॥

વન્દે શ્રીરઘુનન્દનં જનકજાનેત્રાસિતામ્ભોરુહં
    પ્રાલેયામ્બુમનલ્પમઞ્જુલગુણં પદ્માસનોદ્ભાસિનમ્ ।
ચક્રાબ્જેષુશરાસનાનિ દધતં હસ્તારવિન્દોત્તમૈઃ
    શ્રીમન્મારુતિપૂજિતાઙ્ઘ્રિયુગલં ભદ્રાદ્રિચિન્તામણિમ્ ॥ ૬॥

શ્રીરામચન્દ્રવરકૌમુદિ ભક્તલોક
    કલ્પાખ્યવલ્લરિવિનતજનૈકબન્ધો ।  variation  વિનમ્રજનૈકબન્ધો
કારુણ્યપૂરપરિપૂરિતસત્કટાક્ષે
    ભદ્રાદ્રિનાથદયિતે તવ સુપ્રભાતમ્ ॥ ૭॥

અમ્લાનભક્તિકુસુમા મલિનાઃ પ્રદીપાઃ

સૌધાન્ જયત્યવિરલાગુરુધૂમરાજિઃ ।
નાકં સ્વૃશન્તિ ધરણીસુરવેદનાદાઃ
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૮॥

સાન્દ્રોડુરમ્યસુષમા ન વિભાતિરાજા
દીનો યથા ગતવસુર્મલિનાન્તરઙ્ગઃ ।
દૈન્યં ગતા કુમુદિની પ્રિયવિપ્રયોગાત્
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૯॥

પૂર્વાદ્રિપીઠમધિતિષ્ઠતિ ભાનુબિમ્બં
ગાઢં પ્રયાતિ તિમિરં કકુભઃ પ્રસન્નાઃ ।
ત્વત્સ્વાગતં ખગરુતૈઃ કથયન્તિ મન્દ્રં
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૦॥

આદિત્યલોલકરલાલનજાતહર્ષા
સા પદ્મિની ત્યજતિ મા સકૃદાસ્યમુદ્રામ્ ।
ભૃઙ્ગાવલી વિશતિ ચાટુવચાસ્સરોજં
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૧॥

પ્રાલેયબિન્દુનિકરા નવપલ્લવેષુ
બિમ્બાધરે સ્મિતરુચિં તવ સંવદન્તિ ।
આયાન્તિ ચક્રમિથુનાનિ ગૃહસ્થભાવં (આયન્તિ?)
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૨॥

આનેતુમાસ્યપવનં તવ સત્સુગન્ધી
માલ્યાનિ જાતિકુસુમાનિ સરોરુહાણિ ।
આમર્દયન્ સુરભિગન્ધમહો ભિવાતિ
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૩॥

ગોપીકરાકલિતમન્થનરમ્યનાદાઃ
ગોપાલવેણુનિનદેન સમં પ્રવૃત્તાઃ ।
ધુન્વન્તિ હંસમિથુનાનિ તુષારપક્ષાન્
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૪॥

સ્તમ્ભે રમા ઉભયપક્ષવિનીતનિદ્રાઃ
કર્ષન્તિ તે કલિતધીકૃતિશ ૃઙ્ખલાનિ ।
વાદ્યા મુખોષ્મમલિનીકૃતસૈન્ધવાંશાઃ

ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૫॥

શ્રીવન્દિનસ્તવ પઠન્તિ ચ મઞ્જુકણ્ઠૈઃ
રમ્યાવધાનચરિતાન્યમૃતોપમાનિ ।
મન્દ્રં નદન્તિ મુરજાશ્શુભશઙ્ખનાદૈઃ
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૬॥

ઉત્તાનકેતનરતા રવયો મહેશાઃ
શુદ્ધોક્ષવાહનગતા વસવોઽપિ સિદ્ધાઃ ।
દ્વારે વસન્તિ તવ દર્શનલાલસાસ્તે
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૭॥

ચક્રાઙ્ગવાહવિધિરેષ સુરેશ્વરોઽયં
દેવર્ષિભિર્મુનિગણૈસ્સહ લોકપાલૈઃ ।
રત્નોપદાઞ્જલિભરોઽભિમુખં સમાસ્તે
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૯॥

દાતું ભવાન્ વિવિધગોધનરત્નપૂગાન્
આલોકનાય મુકુરાદિ શુભાર્થપુઞ્જાન્ ।
આદાય દેહલિતલે ત્રિદશા નિષણ્ણાઃ
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૧૯॥

ગોદાવરીવિમલવારિસમુદ્ભવાનિ
નિર્હારિપુષ્પવિસરાણિ મુદા હરન્તઃ ।
શુશ્રૂષયા તવ બુધાઃ પ્રતિપાલયન્તિ
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૦॥

એલાલવઙ્ગવરકુઙ્કુમકેસરાદ્યૈઃ
પુન્નાગનાગતુલસીવકુલાદિપુષ્પૈઃ ।
નીતાસ્સુતીર્થકલશા અભિષેચનાય
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૧॥

કસ્તૂરિકાસુરભિચન્દનપદ્મમાલાઃ
પીતામ્બરં ચ તડિદાભમનલ્પમૂલ્યમ્ ।
સજ્જીકૃતાનિ રઘુનાયક મઞ્જુલાનિ
ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૨॥

કેયૂરકઙ્કણકલાપકિરીટદેવ
    છન્દાઙ્ગુલીયકમુખા નવરત્નભૂષાઃ ।
રાજન્તિ તાવકપુરો રવિકાન્તિકાન્તાઃ
    ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૩॥

ગોદાવરીસલિલસમ્પ્લવનિર્મલાઙ્ગાઃ
    દીપ્તોર્ધ્વપુણ્ડ્રતુલસીનલિનાક્ષમાલાઃ ।
શ્રીવૈષ્ણવાસ્તવ પઠન્તિ વિબોધગાથાઃ
    ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૪॥

સ્વર્લોકવારવનિતાસ્સુરલોકતોઽમી
    રમ્ભાદયો વિમલમઙ્ગલકુમ્ભદીપૈઃ ।
સઙ્ઘીભવન્તિ ભવદઙ્ગણપૂર્વભાગે
    ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૫॥

સીતાપ્રવાલસુમનોહરપાણિયુગ્મ-
    સંવાહિતાત્મપદપઙ્કજપદ્મનેત્ર ।
સૌમિત્રિસાદરસમર્પિતસૌમ્યશય્યા
    ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૬॥

શ્રીશેષતલ્પ શરણાગતરક્ષકાર્ક-
    વંશે નિશાચરવધાય કૃતાવતાર ।
પાદાબ્જરેણુહૃતગૌતમદારશાપ
    ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૭॥

પાઠીનકૂર્મકિટિમાનુષસિંહવેષ
    કુબ્જાવતાર ભૃગુનન્દન રાઘવેન્દ્ર ।
તાલાઙ્કકૃષ્ણયવનાન્તકબુદ્ધરૂપ
    ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૮॥

બ્રહ્માદિસર્વવિબુધાંસ્તવ પાદભક્તાન્
    સમ્ફુલ્લતામરસભાસુરલોચનાદ્યૈઃ ।
આનન્દયસ્વ રિપુશોધન ચાપધારિન્
    ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૨૯॥

તલ્પં વિહાય કૃપયા વરભદ્રપીઠં
    આસ્થાય પૂજનમશેષમિદં ગૃહીત્વા ।

ભક્તાનશેષભુવનાનિ ચ પાલયસ્વ
    ભદ્રાદ્રિશેખર વિભો તવ સુપ્રભાતમ્ ॥ ૩૦॥

કુન્દસુન્દરદન્તપઙ્ક્તિવિભાસમાનમુખામ્બુજં
    નીલનીરદકાયશોભિતજાનકીતડિદુજ્જ્વલમ્ ।
શઙ્ખચક્રશરાસનેષુવિરાજમાનકરામ્બુજં
    ભદ્રભૂધરશેખરં પ્રણમામિ રામસુધાકરમ્ ॥ ૩૧॥

અબ્જસમ્ભવશઙ્કરાદિભિરર્ચિતાઙ્ઘ્રિપયોરુહં
    મેરુનન્દનભદ્રતાપસમાનસાબ્જદિવાકરમ્ ।
નમ્રભક્તજનેષ્ટદાયકપદ્મપીઠસમાસ્થિતં
    ગૌતમીક્ષણલાલસં પ્રણમામિ રામસુધાકરમ્ ॥ ૩૨॥

ભીતભાનુતનૂભવાર્તિનિવારણાતિવિશારદં
    પાદનમ્રવિભીષણાહિતવૈરિરાજ્યવિભૂતિકમ્ ।
ભીમરાવણમત્તવારણસિંહમુત્તમવિગ્રહં
    ભદ્રભૂધરશેખરં પ્રણમામિ રામસુધાકરમ્ ॥ ૩૩॥

ઘોરસંસૃતિદુસ્તરામ્બુધિ કુમ્ભવસમ્ભવસન્નિભં
    યોગિવૃન્દમનોઽરવિન્દસુકેસરોજ્જ્વલષટ્પદમ્ ।
ભક્તલોકવિલોચનામૃતવર્તિકાયિતવિગ્રહં
    ભદ્રભૂધરશેખરં પ્રણમામિ રામસુધાકરમ્ ॥ ૩૪॥

ભૂસુતાચિરરોચિષં વરસત્પથૈકવિહારિણં
    તાપનાશનદીક્ષિતં નતચાતકાવલિરક્ષકમ્ ।
ચિત્રચાપકૃપામ્બુમણ્ડલનીલવિગ્રહભાસુરં
    ભદ્રભૂધરશેખરં પ્રણમામિ રામપયોધરમ્ ॥ ૩૫॥

ઇતિ ભદ્રાદ્રિરામ (ભદ્રાચલરામ) સુપ્રભાતસ્તોત્રં સમ્પૂર્ણમ્ ।

Send corrections to sanskrit@cheeful.com

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Bhadradri Rama Suprabhata Stotram*

pdf was typeset on October 21, 2019

Please send corrections to *sanskrit@cheerful.com*